भारतमञ्जरी/आश्रमवासिकं पर्व

< भारतमञ्जरी

आश्रमवासिकं पर्व

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १५.१ ॥

एकच्छत्रां महीं राज्ञि प्रशासति युधिष्ठिरे ।

नाश्रूयतार्तिजः शब्दो न चादृश्यत याचकः ॥ १५.२ ॥

यशसा धर्मवीरस्य तस्य व्याप्ते जगत्त्रये ।

राघवादिकथाबन्धेष्वभून्मन्दाचरो जनः ॥ १५.३ ॥

धृतराष्ट्रः सविदुरो गान्धारी च पतिव्रता ।

सततं दैवतं तस्य बभूवुः प्रतिमां विना ॥ १५.४ ॥

राज(ज्ञः) षड्रसवैचित्र्यवेशवारविधायिनः ।

भोजने धृतराष्ट्रस्य स सूदान्स्वयमैक्षत ॥ १५.५ ॥

तच्छासनान्नाप्रियाणि कुरुवृद्धस्य पाण्डवाः ।

अश्लीलं ददतः सर्वे प्रतिवादं प्रचक्रिरे ॥ १५.६ ॥

राजार्हं भोजनं भुङ्क्ते सर्वमेवाम्बिकासुतः ।

इति विश्राव्य गूढं तु सोऽभवत्फलभोजनः ॥ १५.७ ॥

अहो व्रतवतस्तस्य जापिनः क्षितिशायिनः ।

जायासखस्य वैराग्यं बुबुधे न युधिष्ठिरः ॥ १५.८ ॥

एवं निवसतां तेषां मिथः प्रणयशालिनाम् ।

काले प्रवाहिनि ययुः समः पञ्चाधिका दश ॥ १५.९ ॥

कदाचिदथ संस्मृत्य भीमः कौरवदुर्नयान् ।

चकार तद्वधकथां बहुशब्दं च दुर्मदः ॥ १५.१० ॥

धृतराष्ट्रो जितक्रोधस्तदाकर्ण्य वधूसखः ।

विधायाश्रुतवत्सर्वमभूत्संन्यासलालसः ॥ १५.११ ॥

ततस्तस्यातिनिर्वेदाद्भावभ्रमपराङ्भुखम् ।

बभुव शमकामस्य वैराग्याभरणं मनः ॥ १५.१२ ॥

वियोगशतदग्धानामवमानविषाशिनाम् ।

सर्वत्यागः सुखायैव निर्वाणामृतनिर्झरः ॥ १५.१३ ॥

स युधिष्ठिरमभ्येत्य वनवाससमुत्सुकः ।

उवाच नियमक्षामो दमोपशममन्थनम् ॥ १५.१४ ॥

वर्णाश्रमगुरो राजन्ननुजानीहि पार्थ माम् ।

दशां वृद्धोचितां लब्धुं व्रजाम्येष तपोवनम् ॥ १५.१५ ॥

इयं भवसुखास्वादरतिस्तत्परचेतसाम् ।

नृणामजीर्णतृष्णेव सततं परिवर्धते ॥ १५.१६ ॥

स्पृश मां पुण्यगन्धेन वपुषा धर्मनन्दन ।

स्वस्ति ते पाहि पृथिवीं पुत्रवत्पश्य च प्रजाः ॥ १५.१७ ॥

कोशदुर्गबलादाने कुर्वीथा यत्नमुत्तमम् ।

गूढमन्त्रः प्रजापाल उन्मूला हि नृपश्रियः ॥ १५.१८ ॥

इत्युक्त्वा मूर्ध्न्युपाघ्राय निराहारः कृशो नृपम् ।

कम्पमानतनुर्वृद्धो बभूव गमनोत्सुकः ॥ १५.१९ ॥

तं साश्रुलोचनो राजा ययाचे रचिताञ्जलिः ।

मामुत्सृज्य कथं नाम गन्तुमर्हसि काननम् ॥ १५.२० ॥

त्वत्पादसेवासंतोषं त्युक्तुं नाहमिहोत्सहे ।

वीतरागस्य ते तात गृहेष्वेव तपोवनम् ॥ १५.२१ ॥

इति तेनार्थ्यमानोऽपि बुबुधे न यदा स तत् ।

तदा सत्यवतीसूनुर्मुनिः स्वयमुपाययौ ॥ १५.२२ ॥

स धर्मराजमभ्येत्य बभाषे ज्ञानलोचनः ।

त्यज्यतामेष भूपाल वृद्धो यातु तपोवनम् ॥ १५.२३ ॥

श्रुतस्य वयसो बुद्धेर्विवेकस्य कुलस्य च ।

सुपक्वमनसां काले वैराग्यं परमं फलम् ॥ १५.२४ ॥

जराशुभ्रेषु केशेषु प्रशान्ते विषयादरे ।

तपोवनात्परं मन्ये भूषणं न शरीरिणाम् ॥ १५.२५ ॥

इत्युक्त्वान्तर्हिते व्यासे विषण्णेन महीभुजा ।

कृच्छ्रादिव तथेत्युक्तो जहर्ष कुरुपुंगवः ॥ १५.२६ ॥

स कृत्वा भीष्ममुख्यानां गुरूणां श्राद्धमुत्तमम् ।

महार्हः विपुलं दानं ददौ ब्राह्मणसंमतम् ॥ १५.२७ ॥

ददतस्तस्य नो विघ्नं चक्रिरे पाण्डुनन्दनाः ।

भमस्तु कोपताम्राक्षो धनंजयमभाषत ॥ १५.२८ ॥

किल्बिषं यैः कृतं घोरं पुरास्मासु बहुच्छलम् ।

कौरवाणां कथं श्राद्धे तेषां वित्तव्ययं सहे ॥ १५.२९ ॥

यातु दुर्योधनः पापो नरकं सहितोऽनुजैः ।

वयं श्राद्धं करिष्यामः स्वयं शंतनुनन्दने ॥ १५.३० ॥

इति ब्रुवाणमसकृन्निवार्य पवनात्मजम् ।

नैतद्वाच्यं पुनरिति प्रोवाच श्वेतवाहनः ॥ १५.३१ ॥

अथ प्रतस्थे गान्धार्या सह राजाम्बिकासुतः ।

गावल्गनिसखः पौरानामन्त्र्य विदुरानुगः ॥ १५.३२ ॥

पुत्रैरुदश्रुनयनैः स्नुषाभिश्चार्थिता भृशम् ।

कुन्ती तपोवनरुचिं नात्यजद्देवरानुगा ॥ १५.३३ ॥

अथाग्रे सहितः कुन्त्या धृतराष्ट्रः सहानुजः ।

राजर्षिजुष्टं विपिनं विवेश विशदाशयः ॥ १५.३४ ॥

तत्र राजर्षिवर्येण शतयूपेन संगतः ।

जटावल्कलभृच्चक्रे सानुजः सुचिरं तपः ॥ १५.३५ ॥

तं तीव्रनियमक्षामं नारदाद्या महर्षयः ।

कृतकृत्यतया प्राप्तं द्रष्टव्या द्रष्टुमाययुः ॥ १५.३६ ॥

सर्वाभिर्भरतस्त्रीभिः सहितास्ते महारथाः ।

निधाय काननोपान्ते चतुरङ्गं महद्बलम् ॥ १५.३७ ॥

अपनीतसितच्छत्त्रचामराः पादचारिणः ।

तपोवनं प्रविविशुर्धृतराष्ट्रेण सेवितम् ॥ १५.३८ ॥

ते प्रणम्याम्बिकासूनुं जननीं संजयं तथा ।

विषण्णाः प्रययुर्मूर्च्छां स्नायुशेषान्विलोक्य तान् ॥ १५.३९ ॥

धृतराष्ट्रोऽपि राजानं संजयेन निवेदितम् ।

पप्रच्छ कुशलं कोशे पौरे जनपदे तथा ॥ १५.४० ॥

तपोवृद्धिं ततः पृष्ट्वा कुरुवृद्धं युधिष्ठिरः ।

विदुरः क्वेति पप्रच्छ स च पृष्टस्तमब्रवीत् ॥ १५.४१ ॥

वायुभक्षोऽस्थिशेषाङ्गः स्वेच्छाचारी निरम्बरः ।

विदुरोऽस्मिन्वने पुत्र दृश्यते न च दृश्यते ॥ १५.४२ ॥

इत्युक्ते धृतराष्ट्रेण समभ्यायाद्यदृच्छया ।

विदुरो धूलिदिग्धाङ्गो बिल्वमात्रमुखः कृशः ॥ १५.४३ ॥

आश्रमे स जनं दृष्ट्वा पलायनपरोऽभवत् ।

तमन्वधावदेकाकी साश्रुनेत्रो युधिष्ठिरः ॥ १५.४४ ॥

दृश्यः क्वचिददृश्यश्च विदुरस्तमनादरात् ।

अपश्यद्वीतरागाणां तृणे राज्ञि च तुल्यता ॥ १५.४५ ॥

स वृक्षमूलमाश्रित्य ज्ञानदेहो ज्वलन्निव ।

उक्तो युधिष्ठिरोऽस्मीति राज्ञा संभाषणार्थिना ॥ १५.४६ ॥

निर्निमेषेक्षणो मौनी तं वीक्ष्य क्षपिताशयः ।

नेत्रपाणेन्द्रियैः क्षिप्रं तमेव सहसाविशत् ॥ १५.४७ ॥

देहं निर्मोकवत्त्यक्त्वा प्रविष्टे विदुरे नृपः ।

विहाय राजसं भावं बभूव ज्ञाननिर्भरः ॥ १५.४८ ॥

दग्धुमभ्युद्यतं क्षत्तुरथ तत्र कलेवरम् ।

युधिष्ठिरं व्योमचरा ज्ञानसिद्धा न्यवारयन् ॥ १५.४९ ॥

ततः समेत्य तत्सर्वं धृतराष्ट्राय भूपतिः ।

निवेद्य तस्थौ निर्दुःखः सानुजो मातुरन्तिके ॥ १५.५० ॥

फलाहारः क्षमाशायी क्षपयित्वाथ शर्वरीम् ।

प्रातर्दत्वा यथाकामं द्विजेभ्यो रत्नकाञ्चनम् ॥ १५.५१ ॥

राजर्षिभिः सहासीनं प्रणम्य कुरुपुंगवम् ।

ददर्श तेजसां राशिं प्राप्तं सत्यवतीसुतम् ॥ १५.५२ ॥

व्यासोऽपि धर्मतनयं संभाव्य रचिताञ्जलिम् ।

यतिधर्मेण तां सिद्धिं श्लाघ्यां क्षत्तुरपूजयत् ॥ १५.५३ ॥

अर्थितः क्षत्रवृद्धेन गान्धार्या पृथया तया ।

परलोकगतान्सर्वान्भूपालान्सह कौरवैः ॥ १५.५४ ॥

अदर्शयत्कुरुस्त्रीणां व्यासः स्वर्गनदीजले ।

साध्व्योऽपिताननुययुर्विमानैस्त्यक्तविग्रहाः ॥ १५.५५ ॥

अथ धर्मात्मजो राजा तत्र सप्तर्षिसेविते ।

मासं स्थित्वा पुरं प्रायात्कुरुवृद्धेन चोदितः ॥ १५.५६ ॥

रथाश्वकुञ्जरानीकैः स गत्वा निःश्वसन्मुहुः ।

अकाम इव कृच्छ्रेण राजधानीं समाविशत् ॥ १५.५७ ॥

अथ धर्मेण वसुधां धर्मराजस्य शासतः ।

याति काले सुरमुनिर्नारदः समुपाययौ ॥ १५.५८ ॥

धृतराष्ट्रकथां पृष्टः पूजितः स महीभुजा ।

उवाच राजन्यातोऽसौ राजर्षिः परमां गतिम् ॥ १५.५९ ॥

संवत्सरं वायुभक्षो वर्षं च त्यक्तभोजनः ।

कन्दुकाकारवदनो दुर्लक्ष्यः सोऽभवत्कृशः ॥ १५.६० ॥

ततः स वह्नींस्तत्याज मुमुक्षुर्निष्क्रियो मुनिः ।

कानने तेऽप्यवर्तन्त जरत्तरुनिरन्तरे ॥ १५.६१ ॥

तत्र प्रियासखो राजा कुन्त्या सह महामतिः ।

वनं प्रज्वलितं दृष्ट्वा समाधिं विदधे परम् ॥ १५.६२ ॥

अव्याप्ता व्यापकाः स्वच्छाः स्वयं गलितवृत्तयः ।

स्फुचब्रह्माण्डविवरास्ते धाम परमं ययुः ॥ १५.६३ ॥

एवं शमाङ्कुरस्तेषां सर्वसंन्यासपल्लवः ।

स्वान्तप्रकाशकुसुमः फलितो ज्ञानपादपः ॥ १५.६४ ॥

ततो दावाग्निना तेन दग्धास्ते बन्धुना यथा ।

संजयस्तु व्रतक्षामो यातस्तुहिनभूधरम् ॥ १५.६५ ॥

श्रुत्वैतत्पाण्डुतनयो व्याप्तः शोककृषाणु(शानु)ना ।

शुशोच सानुजः कुन्तीं ससुतं च कुरूद्वहम् ॥ १५.६६ ॥

ततः प्रयाते देवर्षौ राजा कृत्वा जलक्रियाम् ।

तानेवोद्दिश्य विपुलं ददौ द्रविणमक्षयम् ॥ १५.६७ ॥

सोऽथ धैर्यं समालम्ब्य शोकमुत्सार्य देहजम् ।

संसारासारतां ध्यायन्विवेकशरणोऽभवत् ॥ १५.६८ ॥

भावाः स्वभावविशरारव एव तेषु सक्तं मनो न विरहे सहतेऽनुतापम् ।

तत्सर्वथा प्रियवियोगविषाहतानां शान्त्यै सुधा तनुभृतां विपुलो विवेकः ॥ १५.६९ ॥

इति श्रीक्षेमेन्द्रविरचितायां भारतमञ्जर्यामाश्रमवासिकं पर्व

"https://sa.wikisource.org/w/index.php?title=भारतमञ्जरी/आश्रमवासिकं_पर्व&oldid=102001" इत्यस्माद् पुनः प्राप्तिः

- ३१ जनवरी २०१७ (तमे) दिनाङ्कः अन्तिमसम्पादनं ०७:५९ समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।